**दिनाङ्कः:- 08.06.2024**
**प्रातः:- 06:55**

**इयम् आकाशवाणी**

**सम्प्रति वार्ताः श्रूयन्ताम्**

**प्रवाचकः – सुरेशचन्द:शर्मा**

## अथवार्ता:

### प्रधानमन्त्री

प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् तज्जीवनस्य प्रतिक्षणं बाबासाहेब-अम्बेडकर-निर्मिते भारतीये संविधाने निहितेभ्य्: महन्मूल्येभ्य: समर्पितमस्ति। सामाजिक अन्तर्जालीय- पटल – मध्ये श्री मोदी प्रकाशितवान् यत् मत्सदृश: निर्धन: व्यक्ति: देशसेवायै सक्षम:, एतत्केवलं भारतीय-संविधान-कारणेन एव सम्भव:।

### राष्ट्रीय-जनतांत्रिक-ग्रन्थिबंधन-सर्वकारसंरचना

राष्ट्रीय-जनतांत्रिक-ग्रन्थिबंधनं (एनडीए) इत्यस्य संसदीय-दलस्य उपवेशने गत दिने नरेन्द्र-मोदी संसदीय-दलस्य नेता विचितः। भारतीय-जनता-पार्टीति दलस्य वरिष्ठ-नेता, केन्द्रीय-मन्त्री च राजनाथ-सिंहः गत दिने एनडीए-संसदीय-दलस्य नेतृरूपेण नरेन्द्र-मोदिनः नाम्नः प्रस्तावम् उपस्थापयत्। राजनाथसिंहस्य प्रस्तावस्य केन्द्रीय-मंत्री अमित-शाहः, नितिन-गडकरी, टीडीपी-प्रमुखः चंद्रबाबूनायडू, जेडीयू-अध्यक्षः बिहारस्य मुख्यमंत्री च नीतीश-कुमारः, एनडीए-ग्रन्थिबन्धनस्य सर्वाणि घटकदलानि च समर्थनं कृतवन्तः। प्रधानमंत्री नरेन्द्रमोदी, केन्द्रीयमंत्री पीयूषगोयलः, अनुराग-सिंह-ठाकुरः, एलजेपी (आर) प्रमुखः चिराग-पासवानः, एनसीपी-नेता अजित-पवारः, आरएलडी-प्रमुखः जयंत-चौधरी, जन-सेना-प्रमुखः पवन-कल्याणः, अपना-दलस्य (एस) नेत्री अनुप्रियापटेल, जद (एस) नेता एचडीकुमारस्वामी, अन्ये नेतारः च अस्मिन् उपवेशने उपस्थिता आसन्।

### शपथग्रहणसमारोह:

भाजपादलस्य वरिष्ठ-नेता श्रीनरेन्द्रमोदी श्व: तृतीयवारं प्रधानमन्त्रि-पदस्य शपथवचनं स्वीकरिष्यति। शपथ-ग्रहण-समारोहः सायं षड्वादने राष्ट्रपति-भवने भविष्यति। केन्द्रीयमन्त्री प्रह्लादजोशी गतदिने नवदिल्ल्याम् एनडीए-संसदीय-दलस्य उपवेशनावधौ इदं संसूचितवान्। राष्ट्रपति-द्रौपदीमुर्मूवर्यया नरेन्द्रमोदिने तस्य नवनिर्वाचित-सर्वकराय च शपथवचनं ग्राहयिष्यते।

### भारतीय: वैदेशिक: मुद्राकोष:

भारतीय: वैदेशिक: मुद्रकोष: मे-मासान्तं अष्टत्रि-दशमलवोत्तर- चतुर्विलियन-डॉलर-मितात् सम्वर्ध्य पञ्चदशमलवोत्तर-एक पञ्चाशदुत्तर-षट्शतं- बिलियन-डॉलर-मित-राशे: नूतनं उच्चतमं स्तरं प्राप्नोत्। गतदिने मुम्बय्यां वार्ताहर-सभां सम्बोधयन् भारतीय-

रिजर्व-बैंक इत्येतस्य प्रमुख: शक्तिकान्तदास: प्रोक्तवान् यत् देशस्य बाह्य-क्षेत्रम् अतीव सुग्राह्यम्। श्रीदास: प्रोक्तवान् यत् शीर्षकोष: बाह्य-वित्तपोषण- आवश्यकतापूर्तये सारल्येन आश्वस्त: इति।

**मुंबई-आरबीआई-द्वि-मासिकनीति:**

रिजर्वबैंकेन द्विमासिक-मौद्रिक-नीत्याः समीक्षायां रेपो इति क्रयानुबन्धं यथापूर्वं षट्-दशमलवं-पञ्च-प्रतिशतम् एवं विधातुं निर्णयः स्वीकृतः अस्ति। शीर्ष-बैंकेन निरन्तरं अष्टमवारं क्रयानुबन्धमितिम् अधिकृत्य किमपि परिवर्तनं न कृतम् अस्ति। शीर्ष-बैंकस्य मौद्रिक-नीति-समित्याः त्रिदिवसीयोपवेशनं जूनमासस्य पञ्चदिनाङ्के अभवत्।

**भारतीयऋतुविज्ञानविभाग:**

भारतीयऋतुविज्ञानविभागेन आगामि-दिवसेषु पूर्व-भारते, उत्तरप्रदेशे, मध्यप्रदेशस्य केषुचित् क्षेत्रेषु भीषणोष्णप्रकोप: सम्भावितः। विभागेन झारखण्ड, बिहार, उड़ीसा,पञ्जाब-हरियाणा राज्येषु अपि उष्मतरङ्गप्रवाहः सम्भावितः। अवधेयं यत् अग्रिमेषु पञ्चदिवसेषु महाराष्ट्रे, उत्तर-कर्णाटके च भारतीयऋतुविज्ञानविभागेन अतिवृष्टेः सम्भावना प्रकटिता।

**फ्रेंच ओपन-सेमीफाइनल:**

फ्रेंच-ओपन-टेनिस्-स्पर्धायां पुरुषैकलवर्गस्य उपान्त्यचक्रे तृतीय-वरीयताप्राप्तेन स्पेनदलस्य कार्लोस्-अलकराज-गारफिया इत्येतेन द्वितीय-वरीयता-प्राप्तं इटलीदलस्य जैनिक-सिनरः इत्येतं द्वि-षट्, षट्-त्रि, त्रि-षट्, षट्-चतुर्, षट्-त्रि इत्यन्तरालै: पराजितवान्। अपरत्र महिला-एकल-निर्णायक-स्पर्धा अद्य पोलेण्डदेशस्य इगा स्वीटेक अथ इटलीदेशस्य जैस्मीन पाओलिनी इत्येतयो: मध्ये भविष्यति।

**।। इति वार्ता:।।**